**Pt. Vilas Thuse** Panditji@kidsplanetusa.com

# || नवग्रह स्तोत्र ||

जपाकुसुम संकाशं काश्यपेयं महाद्युतिम् |
तमोरिंसर्वपापघ्ने प्रणतोऽस्मि दिवाकरम् || १ ||

दधिशंखतुषाराभं क्षीरोदार्णव संभवम् |
नमामि शशिनं सोमं शंभोर्मुकुटभूषणम् || २ ||

धरणीगर्भ संभूतं विद्युत्कांति समप्रभम् |
कुमारं शक्तिहस्तं च मंगलं प्रणमाम्यहम् || ३ ||

प्रियंगुलिकाश्यामं रूपेणाप्रतिमं बुधम् |
सौम्यं सौम्यगुणोपेतं तं बुधं प्रणमाम्यहम् || ४ ||

देवानांच ऋषीणांच गुरुं कांचनसन्निभम् |
बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् || ५ ||

हिमकुंद मृणालाभं दैत्यानां परमं गुरुम् |
सर्वशास्त्र प्रवक्तारं भार्गवं प्रणमाम्यहम् || ६ ||

नीलांजन समाभासं रविपुत्रं यमाग्रजम् |
छायामार्तंड संभूतं तं नमामि शनैश्चरम् || ७ ||

अर्धकायं महावीर्यं चंद्रादित्य विमर्दनम् |
सिंहिकागर्भसंभूतं तं राहुं प्रणमाम्यहम् || ८ ||

पलाशपुष्पसंकाशं तारकाग्रह मस्तकम् |
रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् || ९ ||

इतिव्यासमुखोद्‌गीतं यः पठेत् सुसमाहितः |
दिवा वा यदि वा रात्रौ विघ्नशांतिर्भविष्यति || १० ||

नरनारी नृपाणांच भवेत् दुःस्वप्ननाशनम् |
ऐश्वर्यमतुलं तेषां आरोग्यं पुष्टिवर्धनम् || ११ ||

ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्‌भवाः |
ताः सर्वाःप्रथमं यान्ति व्यासोब्रूते न संशयः || १२ ||

इतिश्री व्यासविरचितम् आदित्यादि नवग्रहस्तोत्रं संपूर्णम् ||